# संस्कृतवार्ता:

**दिनाङ्क :- 14.04.2025** **प्रात: - 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**प्रवाचिका – निधि: तिवारी**

## अथ वार्ता:

### अम्बेडकरजयन्ती

समग्रं हि राष्ट्रमद्य भारतीयसंविधानस्य मुख्यनिर्मातु: डॉबीआर्. अम्बेडकरवर्यस्य चतुस्त्रिंशदधिकैकशततम्यां जयन्त्यां तस्मै श्रद्धाञ्जलिम् अर्पयति। अत्रावधौ राष्ट्रपतिपदासीना द्रौपदीमुर्मु: डॉ.बी.आर्. अम्बेडकरवर्यस्य जयन्त्यवसरे देशवासिभ्य: शुभकामना: प्रदत्तवती। स्वकीये सन्देशे असौ अवदत् यत् बाबासाहेबवर्यस्य प्रेरणाप्रदं जीवनम् अद्वितीयोपलब्धियुतम् आसीत्। अत्रावसरे सम्पूर्णे देशे अनेके कार्यक्रमा: आयोजयिष्यन्ते। राष्ट्रपति: द्रौपदीमुर्मु: उपराष्ट्रपति: जगदीपधनखड़: प्रधानमन्त्री नरेन्द्रमोदी लोकसभाध्यक्ष: ओम्-बिरला: केन्द्रीयमन्त्रिण: संसत्सदस्या: अन्ये च महानुभावा: अद्य प्रात: संसत्भवनस्य परिसरे बाबा-साहेब-वर्यस्य प्रतिमायां पुष्पाञ्जलिं समर्पयिष्यन्ति। अवधेयं वर्तते यत् डॉ. भीमराव-अम्बेडकर: एक: समाजपरिष्कारक: अर्थशास्त्री राजनीतिज्ञ: आसीत् येन स्वकीयं सम्पूर्णं जीवनं जनेभ्य: समर्पितम्। असौ स्वतन्त्रभारतस्य प्रथम: विधिन्यायमन्त्री अपि जात:। तस्मै नवत्यधिक-नवदश-शततमे वर्षे मरणोत्तरं भारतस्य सर्वोच्चनागरिक-सम्मानं भारत-रत्नं प्रदत्तमासीत्।

### प्रधानमन्त्री-अम्बेडकरजयन्ती

प्रधानमन्त्री नरेन्द्रमोदी अद्य अम्बेडकरजयन्त्यवसरे हरियाणाराज्यं प्रति याति। प्रधानमन्त्री तत्र हिसारतः अयोध्यापर्यन्तम् वाणिज्यिकविमानाय एकस्मै हरितध्वजम् प्रदर्शयिष्यति अपि च हिसार-विमानस्थानकस्य नूतनस्य रोहणाग्रभवनस्य आधारशिलां स्थापयिष्यति तदनु असौ यमुनानगरे अनेकासां विकासात्मकपरियोजनानाम् उद्घाटनं शिलान्यासं च विधास्यति अत्रावसरे उपस्थितान् जनसमागमान् सम्बोधयिष्यति। तत्रैव यमुनानगरे प्रधानमंत्री "दीनबंधु- छोटू-राम-थर्मल-पावर-प्लांट" इत्येतस्य संयन्त्रस्य विद्युत्-एकांशस्य, भारतमाला-परियोजनायाः अन्तर्गतं चतुर्दश-किलोमीटरमितात् अपि अधिकां सुदीर्घां रेवाड़ी-मार्ग-परियोजनां समेत्य भूयोपि सप्तत्यधिकैकसहस्रकोटिरूप्यकाणां विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च करिष्यति। अनया हि परियोजनया रेवाडीनगरे जनसम्मर्दः अल्पो भविष्यति अथ च दिल्ली-नारनौल-मध्ये प्रकल्पितः समयावधिः एकहोरां यावत् भविष्यति।

**अम्बेडकरनगरकोटादिल्लीरेलयानम्**

लोकसभाध्यक्षः ओम्-बिरलाः मध्यप्रदेशस्य मुख्यमन्त्री डॉ. मोहनयादवः केन्द्रीय-रेलमन्त्री च अश्विनी-वैष्णवः ह्यः डॉ. अम्बेडकरनगर-कोटा-नवदिल्ली-एक्सप्रेस इत्येतस्मै रेलयानाय हरितध्वजम् प्रदर्शितवन्तः। श्रीबिरलाः कोटातः अस्मिन् समारोहे सम्मिलितो जातः तत्रैव दृश्य-श्रव्य-परान्तर्जालीय-माध्यमेन डॉ. यादवः श्रीवैष्णवश्च सम्मिलितौ अभवताम्। केन्द्रीयमहिलाबालविकासराज्यमन्त्री सावित्रीठाकुरः डॉ. अम्बेडकरनगरे उपस्थिता आसीत्।

**तमिलनववर्षम्**

अद्य तमिलनववर्षम् परिपाल्यते। चिथिरैमासस्य जन्म सौरपञ्चाङ्गस्य आधारेण आमान्यते। अस्मिन् दिवसे जनाः देवालयान् यान्ति अपि च स्वगृहेषु षट्स्वादिष्टानि भोजनानि निर्मान्ति यानि कदलीपत्रेषु भोग्यार्थम् दीयन्ते।

**भारतम्-लेजरशस्त्राणि**

भारतेन त्रिंशत्-किलोवॉट-मितस्य लेजर-आधारितायाः शस्त्रप्रणाल्याः उपयोगं कृत्वा फिक्स्ड-विंग-एयरक्राफ्ट-प्रक्षेपास्त्रं स्वार्म-ड्रोन-इत्येनं च मारयितुं स्वक्षमता अधिगता। एतेन साकमेव भारतम् अमरीका-चीन-रूस-देशान् समेत्य तेषु चितेषु देशेषु समाविष्टम् येषां निकषा एतादृशी क्षमता विद्यते।

**गाङ्गुलीदलनायकः**

पूर्वभारतीयदलनायकः सौरवगाङ्गुली पुनरेकवारम् आई.सी.सी. इत्येतस्याः पुरुषक्रिकेट् परिषदः अध्यक्षपदाय चितो जातः तस्य च राष्ट्रियस्तरीयः सहयोगी वी.वी.एस्. लक्ष्मणोऽपि समित्याः सदस्यत्वेन निर्वाचितः।

**आई.पी.एल्. क्रिकेट्**

आई.पी.एल्. इत्येतस्यां विंशतिप्रतिविंशतिक्रिकेट्-मालिकायाम् ह्यः निशायां क्रीडिते द्वन्द्वे मुम्बईइण्डियन्सदलं डेल्हीकैपिटल्सदलं द्वादशधावनाङ्कैः पराजितवत्।

**।। इति वार्ताः।।**